# Shri Ganesha Stotram Pashaya Bandhamokshakaram

# પાશાય બન્ધમોક્ષકરં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Pashaya Bandhamokshakaram

File name : gaNeshastotrampAshAyabandhamokShakaraM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 7 | 8.7 1-8||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# પાશાય બન્ધમોક્ષકરં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

અહમુવાચ ।

પાશાય શસ્ત્રરાજાય નમસ્તે બન્ધરૂપિણે ।
મોક્ષરૂપાય વૈ તુભ્યં ગણેશકરભૂષણ ॥ ૧॥
મોહો માયામયઃ પ્રોક્તો બન્ધદઃ સર્વજન્તવે ।
ગણેશજ્ઞાનયુક્તશ્ચેદ્ બન્ધહીનો નરો ભવેત્ ॥ ૨॥
તદેવ બન્ધરૂપાખ્યં શસ્ત્રં તસ્ય મહાત્મનઃ ।
ત્વમેવ પાશરૂપં વૈ બન્ધમોક્ષકરં મહત્ ॥ ૩॥
યે ત્વાં શરણમાપન્નાસ્તેષાં તે બન્ધજં ભયમ્ ।
નાસ્તિ શસ્ત્ર ચ માં પાહિ શરણાગતમાદરાત્ ॥ ૪॥
નમસ્તે તેજસાં નાથ દુષ્ટનાશકરાય તે ।
પાશાય પરમાસ્ત્રાય શસ્ત્રાણાં બ્રહ્મણે નમઃ ॥ ૫॥
એવં સ્તુત્વા મહાપાશં પ્રણનામ કૃતાઞ્જલિઃ ।
અહઙ્કારશ્ચ તં ત્યક્ત્વા પાશો વિઘ્નેશ્વરં યયૌ ॥ ૬॥
(ફલશ્રુતિઃ)
ઇદં સ્તોત્રં પઠેદ્યસ્તુ તસ્ય બન્ધો વિનશ્યતિ ।
માયાપાશમયઃ સાક્ષાદ્ગણેશે સ લભેદ્ગતિમ્ ॥ ૭॥
ગતં પાશં વિલોક્યૈવાહઙ્કારો ગુરુણા યુતઃ ।
ધૂમ્રવર્ણં જગામાઽસૌ તં દૃષ્ટ્વા પ્રણનામ હ ॥ ૮॥

ઇતિ પાશાય બન્ધમોક્ષકરં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૭ । ૮.૭ ૧-૮॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 7 . 8.7 1-8..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Pashaya Bandhamokshakaram*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*